नामांक Roll No.

Sl.No. :

No. of Questions – 23

No. of Printed Pages – 7

**VU–49–Nyay Darshnam**

# वरिष्ठ उपाध्याय परीक्षा, 2023

# VARISHTHA UPADHYAYA EXAMINATION, 2023

## न्याय दर्शनम्

**समय** : 3 **घण्टे** 15 **मिनिट**

**पूर्णांक** : 80

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

1) परीक्षार्थिभि: सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांङ्काः अनिवार्यत: लेख्यः।

2) **सर्वे** प्रश्नाः अनिवार्याः।

3) सर्वेषां प्रश्नानामुत्तराण्युत्तरपुस्तिकायामेव लेखनीयानि।

4) एकस्य प्रश्नस्य सर्वे भागाः एकत्र एव लेखनीया।

5) सर्वे प्रश्नाः संस्कृतमाध्यमेन उत्तरणीयाः।

यहाँ से काटिए

प्रश्न पत्र को खोलने के लिए यहाँ फाड़ें

यहाँ से काटिए

## खण्ड–अ

**1)** वस्तुनिष्ठ प्रश्ना : **[12×1=12]**

i) प्रमा शब्दस्य कोऽर्थ:?

अ) यथार्थज्ञानम् ब) अनुभव:

स) शब्द: द) भ्रम:

ii) तर्कभाषाग्रन्थस्य प्रणेता कोऽस्ति?

अ) अन्नमभट्ट: ब) गौतम:

स) केशवमिश्र: द) कणाद:

iii) लिङ्गपरामर्शो कथ्यते?

अ) अनुमानम् ब) उपमानम्

स) स्वार्थानुमानम् द) परार्थानुमानम्

iv) अनुमानं कतिविधम्?

अ) त्रिविधम् ब) चतुर्विधम्

स) द्विविधम् द) एकविधम्

v) हेतव: कति सन्ति?

अ) त्रय: ब) एक:

स) चत्वार: द) पञ्च

vi) उपमानप्रमाणस्य फलं किम्?

अ) अनुमिति ब) उपमिति

स) अनुमानम् द) स्वार्थानुमानम्

vii) प्रमाणं कतिविधम्?

अ) चतुर्विधम् ब) द्विविधम्

स) त्रिविधम् द) पञ्चविधम्

viii) अनुपद्यमानार्थदर्शनात् तदुपपादकीभूतार्थन्तरकल्पनम् किम्?

अ) निष्पत्ति: ब) सोपपत्ति:

स) अर्थापत्ति: द) शब्दापत्ति:

ix) प्रमाणस्य भाव: कथ्यते?

अ) प्रमाणम् ब) प्रत्यक्षम्

स) परोक्षम् द) प्रामाण्यम्

x) प्रमाया: करणेऽर्थे यथार्थज्ञानेऽर्थे च कस्य शब्दस्य प्रयोग:?

अ) प्रत्यक्षस्य ब) परोक्षस्य

स) उपमानस्य द) प्रमाणस्य

xi) ज्ञाने प्रमाणस्य निर्धारणं भवति?

अ) परत: ब) स्वत:

स) उभयत: द) देशत:

xii) अभावप्रमाणं केषां मते स्वीकृतम्?

अ) जैनमते ब) वेदान्तमते

स) चार्वाकमते द) प्रभाकरमते

2) रिक्तस्थानानि पूरयत – [6×1=6]

i) ............. नाममात्रेण वस्तुसङ्कीर्तनम्।

ii) लक्षितस्य लक्षणमुपपद्यते न वेति विचार ............. ।

iii) ............... प्रमाणम्।

iv) साधकतमं ............... ।

v) सविकल्पकादीनामपीन्द्रियमेव ................. ।

vi) लिङ्परामर्शो ............... ।

3) अति लघूत्तरात्मकाः प्रश्ना : [12×1=12]

i) किं प्रमाणम्?

ii) किं प्रत्यक्षम्?

iii) कतिविधं कारणम्?

iv) किं लिङ्गम्?

v) यत्र धूमस्तत्राग्निरिति साहचर्यनियमः का?

vi) लिङ्गस्य तृतीयज्ञानं कथ्यते?

vii) हेत्वाभासः कतिविधः?

viii) अतिदेशवाक्यार्थस्मरण सहकृतं ज्ञानं कथ्यते?

ix) यथाभूतस्यार्थस्योपदेष्टा पुरूषः कथ्यते?

x) केषांमते शब्दप्रमाणं नास्ति?

xi) अभावग्रहणाय प्रमाणं अंगीकरणीयम्?

xii) प्रत्यक्षेणैव अभावपदार्थस्य ग्रहणं के कुर्वन्ति?

**खण्ड–ब**

लघूत्तरात्मका: प्रश्ना : [13×2=26]

4) कारणस्य किं लक्षणम्?

5) सन्निकर्ष: कतिविध:?

6) जलत्वजाति कथं सिद्धयति?

7) द्रव्यत्वजाति सिद्धो कथं काठिन्यम्?

8) वायो: विषय: क:?

9) आकाशत्वं कथं न जाति:?

10) शब्द: कथं विशेषगुण:?

11) अनुमानेन कथं सिद्धि: तेजत्वस्य तथा चानुमानाकार: कीद्रुश:?

12) स्वर्ण तेज: कथम्?

13) आत्मविषये सांख्यमतं किम्?

14) द्रव्यसमवेत समवेतस्पर्शन प्रत्यक्षे किं कारणम्?

15) व्यापार–शब्दस्य कोऽर्थ:?

16) नैयायिकानां मतेऽभावोपलाभे किं कारणम्?

## खण्ड–स

दीर्घोत्तरात्मका: प्रश्ना: [4×3=12]

17) कस्यचिदेकस्य विवेचनं कुरू।

क) शब्दप्रमाणम्।

ख) उपमानप्रमाणम्।

18) कस्यचिदेकस्य स्वरूपं विवेचनीयम्।

क) स्वार्थानुमानम्।

ख) परार्थानुमानम्।

19) कस्यचिदेकस्य स्वरूपं निरूपणीयम्।

क) पृथ्वी–निरूपणम्।

ख) जल–निरूपणम्।

20) कस्यचिदेकस्य स्वरूपं विवेचनीयम्।

क) वायो: निरूपणम्।

ख) कालस्य निरूपणम्।

**खण्ड – द**

निबन्धात्मकाः प्रश्नाः [3×4=12]

21) हेत्वाभासस्य लक्षणं विलिख्य तस्य भेदान् विवेचयत्।

अथवा

अर्थाक्तेः प्रमाणस्य विवेचनं कुरू।

22) अधोलिखितायां कारिकायां एकस्याः सप्रसंग व्याख्या विधेया।

घरादीनां कपालादौ द्रव्येषु गुणकर्मणोः।

तेषु जातेश्च सम्बन्धः समवायः प्रकीर्तितः।।

अथवा

द्रव्यादय पञ्चभावा अनेके समवायिनः।

सत्तावन्तस्त्रयस्त्वाद्या गुणादिर्निगुणक्रियः।।

23) अधोलिखितायां कारिकायां एकस्याः सप्रसंग व्याख्या कार्या।

उष्णः स्पर्शस्तेजसस्तु स्याद्रूपं शुक्लभास्वरम्।

नैमित्तिकं द्रवत्वं तु नित्यतादि च पूर्ववत्।।

अथवा

प्राणादिस्तु महावायुपर्यन्तो विषयो मतः।

आकाशस्य तु विज्ञेयः शब्दो वैशेषिको गुणः।।

DO NOT WRITE ANYTHING HERE